International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2015; 1(4): 114-115
© 2015 IJSR
www.anantaajournal.com
Received: 15-05-2015
Accepted: 17-06-2015

**अमल सरकार**
शोधर्थी गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार (उत्तराखण्ड)

**Correspondence**
**अमल सरकार**
शोधर्थी गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार (उत्तराखण्ड)

# पुरुषार्थ चतुष्टयस्य समाजनिर्माणे योगदानम

## अमल सरकार

अस्मिन् सृष्टौ मानवः परमात्मनः सर्वश्रेष्ठरचना वर्तते, सः (जीवः) मानुषी वपु धृत्वा लौकिकं सम्पत्ति तु अर्जितवान् किन्तु अलौकिकसम्पत्तेः अर्जनमपि तस्य कर्त्तव्यं भवति। भारतीयसनातनपरम्परायाः अनुसारेण लौकिकजीवनस्य आवश्यकतान् पुरयितुं प्रयत्नशीलमानवजीवन उच्चतमादर्शाश्च आध्यात्मिक जीवने कोक्षपि विरोधे न दृश्यते। यदि जीवनस्य उभयोरपि पक्षेषु समुचितसमन्वयसामऽजस्य स्थापनमेव जीवनस्य सार्थकता विद्यते एतद् एव पुरुषार्थः।
पुरुषार्थः इति शब्दस्य सिद्धिः पुरुषार्थयोः मेलनेन भवति, पुरुषशब्दस्य अर्थः अग्रे पुरुषजाति विशेषं न भूत्वा मानवजीवनं वर्तते, भारतीयदर्शन परम्परायां सांख्याचार्यकपिलेन पुरुषम् आत्मतत्त्वस्य संज्ञा प्रदत्ता।
पुरुषार्थे प्रयुक्तः अर्थः इति शब्दस्य त्रायाः अर्थाः सन्ति प्रथमत्वेन, अर्थः (शब्दविशेषस्य) द्वितीयत्वेन धनम्, तृतीयत्वेन प्रयोजनऽच, चतुष्टय अर्थात् चत्वारोक्ष्वयवा विध अस्य, एते मानवजीवनस्य आधरस्रोता सन्ति धर्मार्थ काममोक्षऽचेति।
सम्प्रति प्रश्नमायाति यत् पुरुषार्थचतुष्टयस्य सम्बन्धः समाजेन सह वर्तते अथवा व्यक्तिना सह समाजरन्तु व्यक्तिना समूहेन निर्मियते अतः समाजः एका अमूर्त अवधरणा वर्तते, अत्रा व्यक्तेः मुख्यता वर्तते कथनस्य आशयमिदमेव वर्तते यत् पुरुषार्थचतुष्टयस्य साक्षात् सम्बन्धः व्यक्तिना सह वर्तते न तु समाजेन सह।

### (1) धर्म

पुरुषार्थचतुष्टयेषु प्रथमः पुरुषार्थः धर्मः वर्तते, अस्य निष्पत्तिः ''धृ धरणपोषणयोः'' इति धतो भवति यस्यार्थ भवति धरणं पोषणऽच, एवं प्रकारेण धर्मः शब्दस्यार्थः भवति, यः समाजं धरयति पोषणऽच करोति सः धर्मः। महाभारते धर्मस्य लक्षणं कृतं यत् –

> **''ध्रियते लोकोक्ष्नेन धङ्गरति लोको वा।''**
> **''धरणाद् धर्ममित्याहूः धर्म धरयते प्रज्ञाः।''**

वैदिककाले यज्ञादिकर्ममेव धर्ममासीत् यागादिरेव धर्माः। मीमांसायामपि उक्तम्–

**''चोदनालक्षणोक्ष्र्थो धर्मः''**

मनुस्मृतौ तु वेदान्, स्मृतिग्रन्थान् सदाचारानेव धर्मस्य लक्षणमुक्तम्–

> **''वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
> **एतच्चतुर्विध्माहुः साक्षात् धर्मस्य लक्षणम्।।''**

गीतायामपि उक्तम् –

> **''वेदेक्षखिलो धर्ममूलम्।।''**

गौतमधर्मसूत्रोक्षपि धर्मस्य लक्षणमुक्तम् – **''वेदो धर्ममूलम्।।''**
धर्मस्य विषये इतोक्षपि भगवता श्रीकृष्णेन गीतायामुक्तम् यत् मनुष्यस्य कर्तव्यमेव तस्य धर्मः वर्तते यदि सः विगुण अपि स्याद् तदापि तस्य धर्मस्य तिरस्कारः न कर्तव्यः धर्मस्य उत्पत्तिविषये कथितम् –

> **सत्याज्जायते, दयया दानेन च वर्तते।**
> **क्षमायां तिष्ठति क्रोधन्नश्यति।।**

**(2) अर्थ**

पुरुषार्थ चतुष्टयेषु अपरः पुरुषार्थः अर्थः वर्तते, अर्थः इति शब्दस्य आशयः अत्रा धनेन, सम्पत्तिना वा वर्तते, अस्य स्थानं धर्मस्याद्यन्तरं वर्तते। तस्य कारणं विद्यते यत् जनः यस्य धनस्य अर्जनं करोति तस्य उपार्जन धर्मानुसारेण भवेत धर्माचारेण संकलितधनमेव अत्रा ''अर्थः'' इति शब्देन परिगण्यते अस्य विपरीत यदि जनः धनार्जनः कुनीतिनाः अधर्मेण च करोति तर्हि तत् धनं पुरुषार्थः इति संज्ञा विनिर्मुक्ता भवति यथा ईशावास्योपनिषदे कथितम्–

**''तेन त्यक्तेन भुऽजीथाः मा गृधः कस्यस्विद् धनम्।।''**

**(3) काम**

अर्थास्यान्तरं तृतीयत्वेन कामः पुरुषार्थः आयाति, पुरुषार्थेषु धर्मार्थोन्तरमेव कामस्यस्थानं दत्तम, सामान्यः जनः कामः इति शब्दस्य अर्थः ''यौवनेच्छा'' इति कुर्वन्ति, किन्तु तथा नास्ति, कामशब्दस्य अर्थः भवति ''सामान्य इच्छा'' लोकेक्ष्स्मिन् इच्छैव बन्धनमोक्षयोः कारण भवति श्रीकृष्णेन गीतायाम् कथितम् –

**''मन एव मनुष्याणां कारणं बन्धन मोक्षयोः।।''**

**(4) मोक्ष**

पूर्णरूपेण प्रशिक्षितमनः एव मोक्षस्य कारणं भवति एनं वैराग्येण अभ्यासेन च प्रशिक्षितं कर्तुं शक्यते अस्य विपरीतं सांसारिकविषयाणां यः भोगः करोति तत् मनः मानवं पशुसदृशं करोति शास्त्रेषु निगदितम् –

**आहारनिद्राभयमैथुनऽच सामान्यमेतत् पशुभिर्नराणाम्।**

मानवः कथं मनुष्यत्वं विहाय पशुत्वं धरयति अस्य विषये भगवता श्रीकृष्णेन गीतायामुक्तम् –

**''धयायतो विषयान्पुंसः संगस्तेषूपजायते।**
**संगाज्जायते कामः कामात् क्रोधक्ष्भिजायते।।**
**''क्रोधत् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।**
**स्मृतिभ्रंशात् बुद्धिर्नाशो, बुद्धिनाशात् प्रणश्यति।।''**

अस्य विपरीतं यदि मानवः आचरति चेत् सः वास्तविकमनुष्यः भवितुमर्हति।

एषः पुरुषार्थचतुष्टयेषु अन्तिमो वर्तते, पूर्वतः त्रिावर्ग धर्मार्थकामस्य साधनायाः एव परमपुरुषार्थस्य प्राप्तिः स्वतः एव मानवं भवति, परन्तु धयातव्यं वर्तते यद् पृथक्–पृथक रूपेण कोक्ष्पि पुरुषार्थः मुक्तिं दातुं न शक्नोति यावत्पर्यन्तं एतेषां सम्मेलनं न भवेत्।

**निष्कर्ष**

उपर्युक्त तथ्यानां विचारेण मननं कृत्वा स्पष्टं भवति यद् धर्मः मानव–हृदयस्य स्पन्दनं वर्तते। अर्थकामौ सम्पूर्णशरीरे संचरितं रक्तमस्ति येन माध्यमेन मानवस्य पूर्णं भवति, मानवजीवनस्य सारभूतं उद्देश्यः आत्मतत्वस्य प्राप्तिः तु त्रिावर्गस्य पालनेन एव भवति, फलतः मानवः स्वस्थलौकिकजीवनं सार्थकं कृत्वा अलौकिकतायाः प्राप्तिं करोति, येन सः जीवनमरणरूपी बन्धनेन मुक्तो भवति।